# || महामृत्युञ्जयस्तोत्रम् ||

|| श्रीगणेशाय नमः ||

विनियोगः –

श्रीमहामृत्युञ्जयस्तोत्रमन्त्रस्य श्री मार्कण्डेय ऋषिः,
अनुष्टुप्छन्दः, श्री मृत्युञ्जय: देवता, गौरी शक्तिः, मम सपरिवारस्य
सर्वारिष्टसमस्तमृत्युशान्त्यर्थं श्री मृत्युन्जय देवता प्रसन्नार्थे च पाठे विनियोगः ।

ध्यानम् –

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तस्थितं
मुद्रापाशमृगाक्षसत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीन्दुप्रगलत्सुधाप्लुततमुं हारादिभूषोज्ज्वलं
कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥

मूल पाठ -

**रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 1॥**

**नीलकण्ठं कालमूर्त्तिं कालज्ञं कालनाशनम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 2॥**

**नीलकण्ठं विरूपाक्षं निर्मलं निलयप्रदम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 3॥**

**वामदेवं महादेवं लोकनाथं जगद्गुरूम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 4॥**

**देवदेवं जगन्नाथं देवेशं वृषभध्वजम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 5॥**

त्र्यक्षं चतुर्भुजं शान्तं जटामकुटधारिणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 6॥

भस्मोद्धूलितसर्वाङ्गं नागाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 7॥

अनन्तमव्ययं शान्तं अक्षमालाधरं हरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 8॥

आनन्दं परमं नित्यं कैवल्यपददायिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 9॥

अर्द्धनारीश्वरं देवं पार्वतीप्राणनायकम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 10॥

प्रलयस्थितिकर्त्तारमादिकर्त्तारमीश्वरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 11॥

व्योमकेशं विरूपाक्षं चन्द्रार्द्धकृतशेखरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 12॥

गङ्गाधरं शशिधरं शङ्करं शूलपाणिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 13॥

Variation
गङ्गाधरं महादेवं सर्वाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 6॥

अनाथः परमानन्तं कैवल्यपदगामिनि ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 14॥

स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ 15॥

**कल्पायुर्द्देहि मे पुण्यं यावदायुररोगताम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥16॥**

**शिवेशानां महादेवं वामदेवं सदाशिवम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥17॥**

**उत्पत्तिस्थितिसंहारकर्तारमीश्वरं गुरुम् ।**
**नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥18॥**

फलश्रुति :

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति नाग्निचौरभयं क्वचित् ॥19॥

शतावर्त्तं प्रकर्तव्यं संकटे कष्टनाशनम् ।
शुचिर्भूत्वा पथेत्स्तोत्रं सर्वसिद्धिप्रदायकम् ॥20॥

मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥21॥

तावकस्त्वद्गतः प्राणस्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं त्र्यम्बकाख्यमनुं जपेत् ॥23॥

नमः शिवाय साम्बाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥24॥

॥ इति श्रीमार्कण्डेयपुराणे मार्कण्डेयकृत महामृत्युञ्जयस्तोत्रं
सम्पूर्णम् ॥

- स्वामी रुपेश्वरानंद
- https://swamirupeshwaranand.in/